## प्रथमाध्यायस्य तृतीयः पादः

### भूवादयो[1] धातवः । (१/१८)

भू इत्येवमादयः शब्दाः [2]क्रियावचना [3]धातुसञ्ज्ञा भवन्ति। 'भू' (धा.पा. १)–भवति । 'एध' (धा.पा. २)–एधते । 'स्पर्ध' (धा.पा. ३)–स्पर्धते । धातुशब्दः पूर्वाचार्यसञ्ज्ञा । [4]ते च क्रियावचनानां [5]सञ्ज्ञां कृतवन्तः । तदिहापि [6]पूर्वाचार्यसञ्ज्ञाश्रयणात् क्रियावाचिनामेव भूवादीनां धातुसञ्ज्ञा विधीयते ।

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते ।
[7]भूवो वार्थं वदन्तीति भ्वर्था [8]वा वादयः स्मृताः ॥ (म.भा. १.२५३)

[9]धातुप्रदेशाः–'धातोः' (३.१.९१/२८२९) इत्येवमादयः ॥

### उपदेशेऽजनुनासिक इत् । (२/३)

उपदिश्यतेऽनेन इत्युपदेशः शास्त्रवाक्यानि, सूत्रपाठः, [10]खिलपाठश्च । तत्र योऽच् अनुनासिकः स इत्सञ्ज्ञो भवति । [11]एध । स्पर्ध । [12]'प्रतिज्ञानुनासिक्याः पाणिनीयाः' (व्या.प. १२१) । उपदेशे इति किम्? 'अभ्र आँ अपः' (ऋ. ५.४८.१) । [13]अच् इति किम्? 'आतो मनिन्क्वनिब्वनिपश्च' (३.२.७४/३४१८)[14] । अनुनासिकः इति किम्? सर्वस्याचो मा भूत् । इत्प्रदेशाः –'आदितश्च' (७.२.१६/३०३६) इत्येवमादयः ॥

### हलन्त्यम् । (३/१)

उपदेशे इति वर्तते[15] । अन्ते भवमन्त्यम् । धात्वादेः [16]समुदायस्य यदन्त्यं हल्, तद् इत्सञ्ज्ञं भवति। अइउण्–णकारः । [17]ऋऌक्–ककारः । [18]एओङ्–ङकारः । [19]ऐऔच्–चकारः । उपदेशे इत्येव । अग्निचित् । सोमसुत् । ह्रस्य ल् [20]हल् इति [21]द्वितीयमत्र हल्ग्रहणं तन्त्रेणोपात्तं [22]द्रष्टव्यम् । तेन प्रत्याहारपाठे हल् इत्यत्र लकारस्य इत्सञ्ज्ञा क्रियते । तथा [23]च सति हलन्त्यम् इत्यत्र प्रत्याहारे नेतरेतराश्रयदोषो[24] भवति ॥

### न विभक्तौ तुस्माः । (४/१९०)

पूर्वेण [25]प्राप्तायामित्सञ्ज्ञायां विभक्तौ [26]वर्तमानानां तवर्गसकारमकाराणां प्रतिषेध उच्यते । तवर्गः, 'टाङसिङसामिनात्स्याः' (७.१.१२/२०१)[27]–वृक्षात्, [28]प्लक्षात् । सकारः, जस् (४.१.२/१८३)–ब्राह्मणाः ।

---

1. यावत् सिद्धं साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते। श्रीनरहरये नमः इत्यधिकम् अ. 2. क्रियावाचिनः अ. क. ड. ह. 3. धातुसञ्ज्ञकाः ड. 4. ते क्रियावाचिनामेव फ. ग. 5. एव धातूनामित्यधिकम् फ. 6. पूर्वाचार्यसंज्ञाग्रहणात् अ. क. फ, °संज्ञाश्रवणात् ह. ड. 7. प्रबोधार्थं ब. 8. भूवादयः फ. 9. वाक्यमिदं नास्ति ह. 10. गणपाठः अ. 11. एध एधते, स्पर्ध स्पर्धते ह. 12. प्रतिज्ञानुनासिकाः ह. 13. अ इति क. 14. इत्यत्र मकार इत्संज्ञो न भवति इत्यधिकम् ड.फ. 15. उदिति च इत्यधिकम् ग. 16. वर्णसमुदायस्य च फ. 17. उदाहरणामिदं नास्ति अ. ग. 18. उदाहरणमिदं नास्ति अ. 19. उदाहरणमिदं नास्ति अ. ड. 20. हल् हल् इति फ. 21. न हलस्येति अधिकम् ग. 22. द्रष्टव्यम् नास्ति ग. 23. च नास्ति क. 24. °दोषः प्राप्नोति ड. 25. इत्संज्ञायां प्राप्तायाम् फ. 26. वर्तमानाः तवर्गसकार-मकाराः इत्संज्ञा न भवन्ति इति प्रतिषेधः फ. 27. इति इत्यधिकम् फ. 28. प्लक्षात् नास्ति अ. ड.